# Shri Dattatreya Shtorashatanama Stotram

# श्रीदत्तात्रेयाष्टोरशतनामस्तोत्रम्

## Document Information

Text title : Shri Dattatreya Shtorashatanama Stotram

File name : dattAtreyAShTorashatanAmastotram.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# श्रीदत्तात्रेयाष्टोरशतनामस्तोत्रम्

ॐ अनसूयासुतोऽनन्त आद्य आत्रेय आत्मदः ।
इडापतिरिलेशार्च्यं ईश ईडितसद्गुणः ॥ १॥

उन्मत्त उत्तमयशा ऊकृदूर्ध्वगतिप्रियः ।
ऋणहर्ता ऋषिश्रेष्ठो ॠवन्द्यो ॠजशिक्षकः ॥ २॥

ऌस्थवन्द्यो ऌगतिदो ॡवन्द्यो ॡपुरःसरः ।
एष्यदिष्टज्ञ एकार्थ ऐक्यात्मप्रद ऐक्यदृक् ॥ ३॥

ओङ्कारवाच्य ओजोद औदासीन्यद औषधः ।
अण्डस्थोन्तःकरणपा अश्वास्तनिजहृन्मलः ॥ ४॥

कर्मातीतः कार्तवीर्येट् खलहा खगपूजितः ।
गतिगङ्गाजलस्नायी घोरहा घनचित्प्रभः ॥ ५॥

ङशिक्षको ङेतमना चतुरश्चन्द्रमोऽग्रजः ।
छन्दपूश्छन्दीड्यो जयदाता जगत्पतिः ॥ ६॥

झञ्झाकरो झरस्नायी ञहर्ता ञविवर्जितः ।
टीकाकृट्टिट्टिभकृट् ठवादिमतहृट्ठवित् ॥ ७॥

डामरेड्यो डमरुधृक् ढक्काकृड्ढुण्डिराट्प्रियः ॥

णवीक्षणो णगम्यश्च तत्त्ववित्तापशामकः ॥ ८॥

थैथैकृत्थृत्कृतानार्यो दत्तो दाता दयानिधिः ।
धनप्रदो धर्मगोप्ता नम्रो नष्टार्थलाभदः ॥ ९॥

परशक्तिः पापहर्ता फलदः फणिसूत्रभृत् ।
बन्धच्छिद्बलवज्जेता भयकृद्भयहृद्भवः ॥ १०॥

मत्तहा माहुरस्थानो यज्ञभोक्ता यदूद्वहः ।
रसदो रिपुसंहर्ता लाभदो लयसिद्धिदः ॥ ११॥

वशी वरेण्यो वरदः शान्तः श्रीपुरभिक्षुकः ।
षड्बाहुः षण्मतगतिः संसारारिश्च सह्यगः ॥ १२॥

हर्षप्रदो हिताशंसी ळान्तार्णो ळविवर्जितः ।
क्षराक्षरातिगः क्षन्ता ज्ञानदो ज्ञानिसद्गतिः ॥ १३॥

एवं वर्णक्रमेणेदं श्रीदत्तस्य महात्मनः ।
अष्टोत्तरशतं नाम्ना प्रसीदेत्पठतां प्रभुः ॥ १४॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं
दत्तात्रेयाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

*Shri Dattatreya Shtorashatanama Stotram*

pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*